# मग्दलमेरी
**magdalamerii**[1]

I

वसन्तरात्र्या धृतचन्द्रपात्र्या
विलिप्तशुम्भद्धवळाङ्गरागा।
गलेलदेशस्य समृद्धिभाजो
नयिन्पुरी हारवदाललास॥ १॥

शीमस्य हर्म्ये नयनाभिराम-
विशालशाले मणिदीपपङ्क्तिः।
विराजिता राजतशृङ्खलासु
सुगन्धतैलाहितभूरिशोभा॥ २॥

नितान्तमस्याः प्रसरत्प्रदीप्ति-
पूरं परं निष्प्रभमादधानः।
तत्रागतः कश्चिदभौमतेजः-
पुञ्जो वहन् पूरुषरम्यरूपम्॥ ३॥

अये गृहस्थ! त्वमभूः सुधन्यो
नैवास्त्यतः प्राघुणिको वरेण्यः।
कोऽयं प्रमादो भवदीयजानु-
द्वयं प्रणामे विमुखं यदास्ते॥ ४॥

लोकेऽखिले दिव्यसमस्तसम्पद-
वापक्षमश्रीकरचुम्बनेऽपि।
उन्माद! किञ्चिद्धनभूरिगर्व!
व्यर्थं शिरस्ते पतितं न किं स्यात्॥ ५॥

विशिष्टरोसाकुसुमाम्बुभिः प्र-
क्षाळ्यं पवित्रं पदपद्मयुग्मम्।
अस्मिन् परीशस्य समृद्धहर्म्ये
न सेव्यते हा! जलबिन्दुनापि॥ ६॥

श्रीपादयुग्मं त्वथवा तदीयं
स्वयं मनोज्ञं खलु पुण्यतीर्थम्।
जग्धिः सुसज्जेति वचोभिरेव
तं स्वागतं कर्तुमियेष शीमः॥ ७॥

तेनैव जूतप्रभुणा निमन्त्रि-
तोऽयं समायादिह येशुदेवः।
वियुक्तपादूकिसलाङ्घ्रिसून-
युग्मेन मन्दं स चरन् विवेश॥ ८॥

[1] Orginal poem in Malayalam by Vallathol Narayana Menon. Translated into Sanskrit by N.V.P.Unithiri, Prof. of Sanskrit, University of Calicut, Kerala.

नृपोचिताडम्बरसुन्दरं त-
त्तळं;समित्रं निषसाद देवः।
विचित्रवर्णोज्ज्वलनव्यरम्य-
क्षौमास्तरे तत्र सुभोजनाय॥ ९॥

अशोकचाम्पेयकयूथिकादि-
पुष्पैः समाकीर्णवनान्तभूमौ।
गोपालकैराप्तवयस्यवृन्दैः
साकं यथा नन्दसुतो दयावान्॥ १०॥ विशेषकम्॥

पश्चाहितांघ्रिर्भगवान् नतांसो
रम्यास्तरन्यस्तसुसव्यहस्तः।
वामेन किञ्चिद्विनतः स भोक्तु-
मासिष्ट लीलावृतनित्यतृप्तः॥ ११॥

अमूल्यपात्रेषु गृहस्थसम्प-
त्समृद्धिवाचिष्वनवद्यहृद्यम्।
स्वादिष्ठभोज्यानि यथेष्टमत्र
सत्पाचकास्ते व्यतरन् समोदम्॥ १२॥

सुसज्जितं सर्वमिदं धनाधि-
नाथेन तस्मै जगदीश्वराय।
विवर्तितं केवलमम्बु हृद्य-
द्राक्षारसत्वेन जवेन येन॥ १३॥

यस्मिन् निराहाररतः स चत्वा-
रिंशद्दिनान्यास तपोनिलीनः।
आत्मानमात्मन्यवलोक्य हृष्टो
हिमाद्रिसानौ गिरिजेशतुल्यम्॥ १४॥

गिरिः स ताबोरभिधस्तमीशं
शिष्यैः सहाघ्नन्तमिहादरेण।
तुष्टाव माध्वीरसशीतवल्ली-
कुञ्जार्द्रपुंस्कोकिलगानपूरैः॥ १५॥ युग्मकम्॥

सशीर्षकम्पं लघु ताळवादं
चकार सानुस्थतरुव्रजोऽपि।
ज्योत्स्नाकृतश्वेतविभूषणाल-
ङ्कृतैर्मरुल्लोळितपत्रवृन्दैः॥ १६॥

प्रसूनपात्रेषु वसन्तलक्ष्मी-
निक्षिप्तमाध्वीरसबिन्दुजालैः।
स्वयं शरीरं सकलं नितान्तं
सन्तर्प्य संप्रोक्षणमादधानः॥ १७॥

परैरदृश्यं मृदुतालवृन्तं
करे वहन् वीजयति स्म मन्दम्।
अलौकिकं येशुमहेशमारा-
दाहारकाले पवनः कृतार्थः॥ १८॥

श्रीयेशुदेवस्य च केशपाशो
वक्त्राम्बुजे भृङ्गततिश्च कृष्णा।
किञ्चिच्चलित्वा विरराज तावत्
कळिन्दजोओल्लोलतरङ्गतुल्यम्॥ १९॥

II

निर्वर्णयध्वे स्फुटतारकाः! कि-
मधोऽचला यूयमिह प्रकामम्।
युष्मासु काचित् पतिता किमत्र
भ्रष्टा पदात् स्वाद् धरणाविदानीम्॥ १॥

तथेयमुर्व्यामिह तारकाया
रूपं वहन्ती पुरवीथिकायाम्।
अन्याथवैका लघुचन्द्रिकेयं
मल्लीप्रसूनाञ्चितचन्द्रिकायाम्॥ २॥

कैषा मनोहारकसर्वगात्री?
केयं त्वराऽस्याः प्रियमानसायाः?।
उत्तुङ्गवक्षश्चलति प्रकाम-
मंसान्तधौतामलचेलिकान्तः॥ ३॥

मुग्धश्च कृष्णो घनकेशपाशः
श्ळथीकृतो भावतरङ्गितायाः।
पृष्ठप्रदेशं नयनाभिरामं
पुष्टां नितम्बस्थलिकां च हृद्याम्॥ ४॥

आच्छादयामास निरन्तराळं
सुदीर्घितानीलवितानतुल्यम्।
किमेतदन्धंतमसं शशाङ्कः
करेण संलाळयति प्रकामम्॥ ५॥ युग्मकम्॥

भव्यः सुगन्धः प्रसरत्यथात्र
कश्चिद् यथा पुष्पितदिव्यवल्याः।
अस्याः सुदत्याः, स च सम्मिळत्ये-
वास्यां लसच्छीतळचन्द्रिकायाम्॥ ६॥

विराजतेऽस्याः परिपाटलार्द्र-
पाणौ लघुस्फाटिकपात्रमेकम्।
अत्यन्तरम्ये स्फुटिते सरस्यां
रक्तोत्पले हंस इवाभिरामः॥ ७॥

एकाकिनीयं रमणी प्रयान्ती
स्यादेव गेहं प्रियकामुकस्य।
प्रच्छन्नमूर्तिः प्रणयः पुरो वा
गच्छेदिहास्या धृतखड्गहस्तः॥ ८॥

समुल्लसत्वङ्गजनुर्यथेष्टं;
नैवं मनोज्ञाङ्ग्यभिसारिकेयम्।
भीतिर्न दृश्या हि न संशयो वा
तस्या मुखे पङ्कजकोमळेऽस्मिन्॥ ९॥

इहाथवास्यास्त्वभिसारिकाया
बन्धो न चैवेदृशभावनायाः।
एषा गमिष्यत्यधुना महेशं
सर्वैर्निकामं ह्यभिसारणीयम्॥ १०॥

प्रिये! समाश्वासय कामिनि! त्व-
मतःपरं कामितमस्ति किं ते।
जवस्फुरन्मीनविलोचने! ते
सङ्केत एवास्ति पुरो विशुद्धः॥ ११॥

परीशगेहस्य कवाटमेषा
सरोजनेत्रा विवृतं च सम्यक्।
सर्वाङ्गरोमाञ्चवती द्युलोक-
द्वारं यथा भासुरमालुलोक॥ १२॥

अस्तङ्गतोऽस्या गतिवेग एव
नद्या इवासन्नजलाधिराशेः।
कृष्टेव भूयोऽपि यथापुरं सा
मनोज्ञपाशेन पुरो जगाम॥ १३॥

सुदीर्घकालप्रवियोगदुःखा-
दनन्तरं वत्सलबालकान्ते।
समागतायाः प्रियमातुरन्त-
र्भावाकुलत्वं भजते कृशाङ्गी॥ १४॥

पुनश्च सोत्कण्ठमियं पदं प्र-
त्यनेकसोपानसमुत्क्रमेण।
परीशगेहं प्रविवेश पूर्ण-
चन्द्रानना निःश्वसितैर्निकामम्॥ १५॥

पश्चात्कृता बालतरङ्गिणी किं
प्रशान्तगम्भीरमहाब्धिभङ्गैः।
अम्भोरुहाक्षी सहसाधुनेयं
विकारसङ्घर्षभरेण तस्थौ॥ १६॥

मा तिष्ठ मुग्धे! विचिकित्सयैत-
द्द्वारीह, चान्तः प्रविश स्वतन्त्रा।
अन्याय्यमार्गाहितपादपङ्को
मृष्टो हि ते बाल्पकणैरमीभिः॥ १७॥

III

दारिद्र्यशुष्के गृहके किलेयं
मनोहराङ्गी समजायतैव।
शिलातले रूक्षतमे मनोज्ञं
जातं हि रोसाकुसुमं कथञ्चित्॥ १॥

निःसीमकान्ति प्रसरत्सुगन्धं
तारुण्यलक्ष्म्या विललास चैतत्।
तदा पुराऽऽज्ञातकुटी नराणा-
मासीत् समेषां रमणीयहर्म्यम्॥ २॥

स्वार्थैकलोलाः पुरुषाः समेऽपि
कामप्रपूर्त्यै कमनीयगात्रीम्।
तत्रागतास्तामुपभुज्य पङ्के
प्रापातयद् रम्यमहो! प्रसूनं॥ ३॥

साध्वीं विटास्ते विदधुः स्वकीयां
सहोदरीमेकविदग्धवेश्याम्।
सुनिर्मलं लोकसरः प्रकामं
कुर्वन्ति मर्त्याः खलु पङ्कपूर्णम्॥ ४॥

ददौ निकामं स हि सर्गकर्ता
स्वर्गीयसौन्दर्यममोघमस्यै।
परन्तु तत्सद्गुण एव तन्वी-
मपातयद् दुर्नरके तदानीम्॥ ५॥

आरम्भकाले न हि नीतियुक्तं
दुष्टं विटाराधनमेतदेवम्।
निषेधशब्दस्त्विह कोमळाङ्ग्या
हृदन्तराळे स्फुरति स्म नूनम्॥ ६॥

स एव शब्दश्च मुहुर्मुहुस्त-
न्मनोज्ञकर्णद्वयभेदकोऽभूत्।
कालक्रमात् कामुकचाटुवाचा-
जालप्रघोषे निममज्ज सोऽपि॥ ७॥

दारिद्र्यपीडाग्ळपितात्मनस्त-
च्चारित्रभूषाप्यतिमात्रवेगात्।
क्रीता भविष्यत्युपभोक्तृवृन्दै-
र्वितीर्णधाराळसुवर्णनाण्यैः॥ ८॥

दृश्यानि चैतत्परितः सुवर्ण-
नाण्यान्यभीकैरभितर्पितानि।
तदीयरम्याङ्गसुवर्णवल्ली-
विकीर्णपुष्पाणि यथा बहूनि॥ ९॥

उत्तेजिका मन्मथशिल्पदीप्त-
नेत्रप्रतिक्षिप्तकटाक्षवीक्षा।
प्रत्येकमप्यत्र सहस्रसङ्ख्य-
माहेन्द्रनीलाधिकमूल्यकासीत्॥ १०॥

सर्वस्य लोकस्य च दुग्धसार-
प्रतीतिदेनैव मृदुस्मितेन।
लोलायताक्ष्यास्तृणकुत्यभूत् सा
कैलासशैलोन्नतराजहर्म्यम्॥ ११॥

भवन्ति नैके भ्रुकुटीविलास-
नृत्यानि तस्याः प्रतिपालयन्तः।
अतःपरं काम्यमभूत् किमस्या
नृपालवृन्दोऽपि हि भृत्यवर्गः॥ १२॥

दारिद्र्यपाताळगतेयमद्य
धौतातपत्रोज्ज्वलराजपत्नी।
सौन्दर्य! नारीवपुषा युतं चे-
दहो! न साध्यं किमु तेऽवशिष्टम्॥ १३॥

IV

इत्थं सुसम्पत्यहिबालिशान्त-
विन्यस्तपादां सुदतीं सुषुप्ताम्।
प्राबोधयन् तत्र यदृच्छया तां
सत्प्रेरणानिःश्वसितानि मन्दम्॥ १॥

कुतश्चिदारान्मधुवत्सुशीत-
समीरणानीतविशिष्टसूक्तिः।
उन्मील्य नेत्रे परितःस्थितिं तां
सन्दर्शयामास विशालनेत्राम्॥ २॥

क्रिस्तोर्मुकुन्दस्य विशिष्टधर्मो-
पदेशचेतोहरवेणुगानम्।
श्रुत्वा मुहूर्तं चलनं विना सा
वृन्दावनस्था हरिणीव तस्थौ॥ ३॥

"रक्ष स्वचारित्र"मियं षडक्ष-
र्येतत्पुरस्तारकवद्विरेजे।
सारं गृहीत्वा निजजीविताख्य-
विस्मापकग्रन्थविशेषमेषा॥ ४॥

विवृत्य पारायणतत्परासीद्
यदा तदा नैव ददर्श तत्र।
चारित्रशब्दोऽप्यथ सम्भ्रमेण
भीत्या च साऽऽभूद् विवशान्तरङ्गा॥ ५॥ युग्मकम्॥

पाताळगर्तान्मणिरम्यहर्म्यं
येनेह हर्षेण समारुरोह।
सोपानमेतन्न निबद्धमिन्द्र-
नीलैस्तु दुष्पङ्कमयेष्टिकाभिः॥ ६॥

केळीगृहं शारदपूर्णचन्द्र-
बिम्बेन युद्धोत्सुकमेतदद्य
भयङ्करं स्म प्रतिभाति चान्ध-
तामिस्रदेशेन समं नताङ्ग्याः॥ ७॥

बहुत्र सौधे विवृतानि तानि
विचित्रशिल्पानि कवाटकानि।
तन्नेत्रयुग्मस्य तु नारकाणां
ग्रासोत्कवक्त्राणि परं बभूवुः॥ ८॥

मनोज्ञमञ्चे विलसन्मराळ-
तूलीप्रपूर्णानि तु सस्तराणि।
शिताग्रकाळायसकीलजाल-
निबद्धवस्तून्यभवन् कृशाङ्ग्याः॥ ९॥

विशिष्टचामीकरपञ्जरस्थ-
कीराङ्गनाया वदनाद् गळन्ती।
"शतं पणा भट्टिनि! भट्टिनी"ति
वाणी सदाऽव्यक्तमनोहरी सा॥ १०॥

सर्वाङ्गलावण्यसुलाळितायाः
वेश्याकुमार्याः श्रवणान्तराळे।
अरुन्तुदं प्रक्षिपति स्म गाढं
दुष्कर्मरक्षोभयदाट्टहासम्॥ ११॥ युग्मकम्॥

स्फाटीकविस्तीर्णगवाक्षकेषु
चेतः समावर्जयितुं नराणाम्।
विलम्बमानाऽऽर्द्रदुकूलराजि-
र्विभ्रान्तमाध्वीव्रतपुष्पवात्याम्॥ १२॥

आसिक्तसर्वाङ्गमरन्दबिन्दु-
समीरणान्दोळनलोळिताङ्गा।
वलीभिरेनां कटु तर्जयन्ती
"पश्ये"ति भीतिप्रदमाह मौनम्॥ १३॥ युग्मकम्॥

सुवर्णमुष्टीभृततालवृन्तै-
र्विनम्रमावीजयितुं समीपे।
स्नेहेन संवाहयितुं पदाब्जं
शुश्रूषणार्थं प्रतिबद्धचित्ताः॥ १४॥

कृत्यानि निर्वोढुमिहेतराणि
भृत्येषु भक्त्या परितःस्थितेषु।
तापोद्वमत्पावकभूतवृन्दै-
र्वृतेव बाला चकिता बभूव॥ १५॥ युग्मकम्॥

जाता च काचिन्मरुभूमिरस्या
ज्वलन्मनोराज्यविशालभूमौ।
न किञ्चनास्त्यत्र हरिन्मयं या
मध्याह्नसूर्ये तपति स्म तीक्ष्णम्॥ १६॥

गृहोचितं भोग्यचयं च सर्वं
महार्हचामीकरनावमेकम्।
आरोप्य तामग्निसमुद्रमध्ये
चिक्षेप तस्मिन् दनुजस्तु कश्चित्॥ १७॥

समुत्थितास्तज्ज्वलदग्निमध्यात्
काळायसाङ्गाश्च करान् प्रसार्य।
आलिङ्गनैस्तान् निगृहीतुकामा
बभूवुरेवं प्रतिभाति तस्याः॥ १८॥

अतः क्व यामीश्वर! दुःखमेतत्
कं वा ब्रवीमीति रुरोद बाला।
रुदेहि मेरि! प्ररुद, प्रशान्तिं
प्रदास्यतीशो रुदतां जनानाम्॥ १९॥

यदक्षियुग्मं पटुवीरवृन्द-
माक्रन्दयामास तु लीलया तत्।
विशिष्टतीर्थाम्बिव किञ्चिदेतां
पूतां व्यधात् पातकभीतचित्ताम्॥ २०॥

विस्मृत्य सर्वं हृदयं तमस्या
येशुं महेशं शरणं प्रपेदे।
"आस्थान्यहं भारविमर्दितानां"-
मित्यूचिवांसं परमं दयालुम्॥ २१॥

प्रस्तावनेयं परमार्थिकेति
व्यक्तं समेषामत एव चास्याः।
न कोऽपि लोके परमाश्रयस्त-
दन्यो गिरीन्द्रोत्कटपापभाजः॥ २२॥

एवं निकृष्टदिनकर्मचयाद् विमुच्य
सेयं महेशदृढभक्तिमवाप चान्ते।
घोरान्धकारनिबिडापि निशा क्रमेण
सूरस्य तेजसि परं विलयं चकार॥ २३॥

वित्तं तया परिसमार्जितमेतदन्तं
दत्तं तु सर्वमथ दीनजनव्रजेभ्यः।
सन्तापसंशमनदं विधिवन्महेशं
निध्याय सा च मुनिवृत्तिपरायणाऽऽसीत्॥ २४॥

पश्चादपीह कतिचिद् दिवसान् विटानां
साकूतसस्पृहकटाक्षनिरीक्षणानि।
प्रातापयन् मृदुलसूनकळेबरं तद्
घोरप्रभावयुतभिन्दिशिलासमानम्॥ २५॥

पूर्वेद्युरत्र गणिका परिदृश्यते स्म
याऽसौ तथा न हि परं त्वधुना वराङ्गी।
चारित्रमूर्तिरियमेकदिनेन चैव
साकल्यतोऽपि परिवर्तनपात्रमासीत्॥ २६॥

एवं च सेयमपरं नवजन्म लब्ध्वे-
वानन्दमप्यनुभवत्यकळङ्कहृद्यम्।
मर्त्यं निपातयति नूनमधः स एव
चोत्थापयत्यथ जवादपि सोऽयमेव॥ २७॥

V

एषा च साध्वी प्रविवेश गेहं
सङ्केतमुद्दिष्टमिमं पुरैव।
शीमस्य वक्त्रं तु विवर्णभावं
भेजे किमेतन्मणिरम्यहर्म्ये॥ १॥

शङ्काविहीनं प्रविशत्यथेयं
वेश्या शरव्या दृषदां प्रदृष्टा।
न कश्चिदूचे विपरीतवाचं
जिह्वा तदीया तु मदोत्कटापि॥ २॥ युग्मकम्॥

बद्धा दृढं तद्रसना महत्या
शक्त्या कयाचित् क्षणमात्रमेव।
मिथ्याभिजात्य! प्रभवस्तवेदं
तेजो हि लोके तमसां समेषाम्॥ ३॥

साष्टाङ्गपातं प्रणनाम सेयं
वन्द्यस्य नाथस्य पदाब्जयुग्मे।
स्वान्तःप्रतिष्ठापितमेव नित्य-
कल्याणदं चोत्तमभक्तिपूर्वम्॥ ४॥

दिव्यस्वरूपं तदिदं पुरस्ता-
च्चैतन्यधन्यं परिलालसीति।
दृश्यं किमन्यत्त्वभिदर्शनीय-
मस्या विशालायतलोचनाभ्याम्॥ ५॥ युग्मकम्॥

अस्या महेशाभिमुखी रतिः सा
मनोज्ञशुभ्रप्रणयाभिपूर्तिः।
अन्तःप्रपूर्णा तु बहिर्गळन्ती
बभूव तच्चारुविलोचनाभ्याम्॥ ६॥

श्रीपादयुग्मं यदनेन गेह-
नाथेन शुद्धेन निषिद्धपाद्यम्।
प्रक्षाळितं नेत्रजलैस्तदेक-
वारस्त्रिया पश्यति शुद्धचित्ते॥ ७॥

निष्पङ्कबाष्पैः परिधौतमस्य
श्रीपादयुग्मं विनयातिरेकात्।
केशैस्तनुक्षौमनिभैर्निकामं
प्रमार्ज्य तस्मिन्नभिसारिकेयम्॥ ८॥

मुखाम्बुजेनाधिकपेलवेन
चापातयद् विद्रुमरत्नजालम्।
अद्यैव भद्रे! विमलं मुखं ते
स्थाने तथाभूत् तव चुम्बनं च॥ ९॥ युग्मकम्॥

अनन्तरं सा निजभाजनस्थं
धन्यं महार्हं तिलजं सुगन्धि।
प्रसारयामास च मूर्ध्नि तस्य
प्रसूनसौरभ्यकृतः कृशाङ्गी॥ १०॥

दृष्ट्वापि वैरस्यमिहातिथेये
देवः स पातित्यनिवारणोत्कः।
संवर्धमानः सितचन्द्रिकाया-
श्छायां मृदुस्मेरमुखो बभूव॥ ११॥

स्नेहे रमण्या निममज्ज देवः;
पार्श्वस्थिता विस्मयभावमग्नाः।
तस्यास्तु सत्कर्मसुगन्धपूर-
स्तारापथं च प्रविवेश वेगात॥ १२॥

कुब्जा च सैरन्ध्र्यरविन्दनेत्रं
राजाङ्गरागेण यथा मुकुन्दम्।
अन्यादृशामोदमनोहरार्द्र-
तैलाभिषेकेण तथा नताङ्गी॥ १३॥

कन्यातनूजं परितुष्टचित्तं
कृत्वा निशश्वास सुदीर्घमेषा।
लोकैकनाथे परमात्मनीह
स्वात्मानमप्यर्पयितुं मुदा वा?॥ १४॥ युग्मकम्॥

सगद्गदं तद्गळतो विपञ्ची-
गानं समुद्भूतमथैकमेवम्।
"कृतं तवाज्ञानुसृतं न किञ्चि-
न्नानापराधान् ,भगवन्! चकार॥ १५॥

एवंविधाहं कटुपापिनीति
क्षमस्व सर्वं प्रियनाथ! शास्तः!।
श्रीपादयुग्मं शरणं विधातुं
समागतां मां कुरु कुम्भदासीम्॥ १६॥

"समाहृत, द्वारमपावृतं स्या"-
दिति त्वया पूर्वमुदाहृतं हि।
अनुग्रहद्वारि तवाहमन्तः-
प्रवेष्टुकामास्मि तथा कुरु त्वम्॥१७॥

क्ळान्तास्मि हा! दुःखमहासमुद्र-
कल्लोलमालासु विलोडिताहम्।
आरोपयेमामचरस्त्वमम्बु-
राशेरुपर्येतदतिप्रसिद्धम्॥ १८॥

लीलारतेनैव पिशाचकेन
पर्यास्तृतायामिह शादभूमौ।
चर्तुं गतैणी तु निराश्रयाहं
निरापतं कण्टकगर्तमध्ये"॥ १९ ॥

एवं वदन्ती मधुभाषिणीय-
माक्रन्दमाना क्षणमत्र तस्थौ।
तदश्रुवर्षे विभुहृत्सरस्त-
त्कृपामृतैः पूर्णमभून्नितान्तम्॥ २०॥

"निषिद्धकृत्यान्यनया कृतानि
तथापि सर्वेश्वर! मा त्यजेमाम्।
शीतीकरोत्यग्निमपि प्रभुर्य-
स्त्वमेव मामप्यसृजः कराभ्याम्॥ २१॥

अतः खलश्येनमुखाद् दयालो!
जवादिमामार्तकपोतबालाम्।
संरक्ष्य भूयो भवदीयनीडं
प्रवेशयार्तार्तिहर! प्रभो! त्वम्॥ २२॥

विशिष्टसत्त्वात्मकभक्तिमाध्वी-
रसार्थनारूपवचःप्रसूनैः।
दन्तातिमुक्ताभसितार्द्रपट्ट-
सूत्रैश्च निर्माय मनोज्ञमालाम्॥ २३॥

येशोर्महेशस्य पुरः समर्प्य
साष्टाङ्गपातं च पुनः प्रणम्य।
श्रीपादयुग्मं तदचुम्बदेषा
बाला मराळीव सरोजसूनम्॥ २४॥ युग्मकम्॥

आनन्दशान्तिः प्रससार तत्र,
प्रदीपनाळश्च सुनिश्चलोऽभूत्।
उन्निद्रतारानिचयस्य मध्ये
चन्द्रो ललासाधिककान्तिपूरैः॥ २५॥

आविर्बभूवाथ विहायसान्ते
शुभ्राम्बुदश्वेतविमानवृन्दः।
भयङ्करान्नारकतो विमुच्य
स्वर्लोकमानेतुमिवाशु साध्वीम्॥ २६॥

कैवर्तका यस्य तटे च येशु-
नाथेन दत्तेन सुबन्धनेन।
पीडां विना विश्रुतपुण्यमत्स्यान्
ग्रहीतुमभ्यासमधीतवन्तः॥ २७॥

सोऽयं गलेलाम्बुधिरत्र दृष्ट्वा
पापाद्विमुक्तिं त्वभिसारिकायाः।
आह्ळादकल्लोलपरम्पराभिः
प्राघोषयद् दुन्दुभिनादमारात्॥ २८॥ युग्मकम्॥

शोकान्धनेत्रीमुरुभक्तियुक्तां
क्रिस्तोर्महेशस्य कटाक्षवीक्षा।
पस्पर्श तामादरपूर्वमर्क-
स्याद्यांशुवच्छान्तविभातकाले॥ २९॥

प्रेमस्वरूपभगवन्मुखतः कृपाया
बिन्दुर्निरर्गळदलं मधुरोक्तिरूपा।
तस्याश्चिरं न तु भवेदिति चिन्तयैव
सन्तापमन्तरिह चातकबालिकायाः॥ ३०॥

"वत्से! विहाय पुरुखेदमितः प्रयात
विश्वास एव हृदि ते परिरक्षकोऽभूत्।
सर्वस्य तस्य कृतपातकसञ्चयस्य
नूनं सुनिष्कृतिरिहानुशयोऽयमेव"॥ ३१॥